# Shri Hanumatstotram

# श्री हनुमत्स्तोत्रम्

## Document Information

Text title : Shri Hanumatstotram

File name : hanumatstotramshrIdharasvAmI.itx

Category : hanumaana, shrIdharasvAmI, stotra, aShTaka

Location : doc_hanumaana

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# श्री हनुमत्स्तोत्रम्

(प्रमाणिका वृत्तम्)
सुखैकधाम भूषणम् मनोजगर्वखण्डनम् ।
अनात्मधीविगर्हणम् भजेषमञ्जनीसुतम् ॥ १॥

भवाम्बुधिं तितीर्षुभिः सुसेव्यमानमद्भुतम् ।
शिवावतारिणं परम् भजेऽहमञ्जनीसुतम् ॥ २॥

गुणाकरं कृपाकरम् सुशान्तिदं यशस्करम् ।
निजात्मबुद्धिदायकम् भजेऽहमञ्जनीसुतम् ॥ ३॥

सदैव दुष्टभञ्जनम् सदा सुधर्मवर्धनम् ।
मुमुक्षुभक्तरञ्जनम् भजेऽहमञ्जनीसुतम् ॥ ४॥

सुरामपादसेविनम् सुरामनामगायिनम् ।
सुरामभक्तिदायिनम् भजेऽहमञ्जनीसुतम् ॥ ५॥

विरक्तमण्डलाधिपम् सदात्मवित्सुसेवितम् ।
सुभक्तवृन्दवन्दितम् भजेऽहमञ्जनीसुतम् ॥ ६॥

विमुक्ति विघ्ननाशकम् विमुक्ति भक्तिदायकम् ।
महाविरक्तिकारकम् भजेऽहमञ्जनीसुतम् ॥ ७॥

सुखंयदेवमद्वयम् बृहत्त्वमेव तत् स्वयम् ।
इतीह बोधिकं गुरुम् भजेऽहमञ्जनीसुतम् ॥ ८॥

विरक्तिमुक्तिदायकम् इमं स्तवं सुपावनम् ।
पठन्ति ये समादरात न संसरति ते ध्रुवम् ॥ ९॥

॥ इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरु भगवता
श्रीधरस्वामिना विरचितं श्रीसमर्थरामदास स्तोत्रं सम्पूर्णम् ॥

*Shri Hanumatstotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*